# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

## अध्याय ५२

तदुक्तमतिकायस्य बलिनो बाहुशालिनः ।
कुम्भकर्णस्य वचनं श्रुत्वोवाच महोदरः ॥१॥

कुम्भकर्णकुले जातो धृष्टः प्राकृतदर्शनः ।
अवलिप्तो न शक्नोषि कृत्यं सर्वत्र वेदितुम् ॥२॥

न हि राजा न जानीते कुम्भकर्ण नयानयौ ।
त्वं तु कैशोरकाद्धृष्टः केवलं वक्तुमिच्छसि ॥३॥

स्थानं वृद्धिं च हानिं च देशकालविभागवित् ।
आत्मनश्च परेषां च बुध्यते राक्षसर्षभ ॥४॥

यत्तु शक्यं बलवता कर्तुं प्राकृतबुद्धिना ।
अनुपासितवृद्धेन कः कुर्यात्तादृशं बुधः ॥५॥

यांस्तु धर्मार्थकामांस्त्वं ब्रवीषि पृथगाश्रयान् ।
अनुबोद्धुं स्वभावेन न हि लक्षणमस्ति ते ॥६॥

कर्म चैव हि सर्वेषां कारणानां प्रयोजनम् ।
श्रेयः पापीयसां चात्र फलं भवति कर्मणाम् ॥७॥

निःश्रेयस फलावेव धर्मार्थावितरावपि ।
अधर्मानर्थयोः प्राप्तिः फलं च प्रत्यवायिकम् ॥८॥

ऐहलौकिकपारत्र्यं कर्म पुम्भिर्निषेव्यते ।
कर्माण्यपि तु कल्प्यानि लभते काममास्थितः ॥९॥

तत्र क्लृप्तमिदं राज्ञा हृदि कार्यं मतं च नः ।
शत्रौ हि साहसं यत्स्यात्किमिवात्रापनीयते ॥१०॥

एकस्यैवाभियाने तु हेतुर्यः प्रकृतस्त्वया ।
तत्राप्यनुपपन्नं ते वक्ष्यामि यदसाधु च ॥११॥

येन पूर्वं जनस्थाने बहवोऽतिबला हताः ।
राक्षसा राघवं तं त्वं कथमेको जयिष्यसि ॥१२॥

ये पुरा निर्जितास्तेन जनस्थाने महौजसः ।
राक्षसांस्तान्पुरे सर्वान्भीतानद्यापि पश्यसि ॥१३॥

तं सिंहमिव सङ्क्रुद्धं रामं दशरथात्मजम् ।
सर्पं सुप्तमिवाबुध्द्या प्रबोधयितुमिच्छसि ॥१४॥

ज्वलन्तं तेजसा नित्यं क्रोधेन च दुरासदम् ।
कस्तं मृत्युमिवासह्यमासादयितुमर्हति ॥१५॥

संशयस्थमिदं सर्वं शत्रोः प्रतिसमासने ।
एकस्य गमनं तत्र न हि मे रोचते तव ॥१६॥

हीनार्थस्तु समृद्धार्थं को रिपुं प्राकृतो यथा ।
निश्चितं जीवितत्यागे वशमानेतुमिच्छति ॥१७॥

यस्य नास्ति मनुष्येषु सदृशो राक्षसोत्तम ।
कथमाशंससे योद्धुं तुल्येनेन्द्रविवस्वतोः ॥१८॥

एवमुक्त्वा तु संरब्धं कुम्भकर्णं महोदरः ।
उवाच रक्षसां मध्ये रावणो लोकरावणम् ॥१९॥

लब्ध्वा पुनस्तां वैदेहीं किमर्थं त्वं प्रजल्पसि ।
यदेच्छसि तदा सीता वशगा ते भविष्यति ॥२०॥

दृष्टः कश्चिदुपायो मे सीतोपस्थानकारकः ।
रुचितश्चेत्स्वया बुद्ध्या राक्षसेश्वर तं शृणु ॥२१॥

अहं द्विजिह्वः संह्रादी कुम्भकर्णो वितर्दनः ।
पञ्चरामवधायैते निर्यान्तीत्यवघोषय ॥२२॥

ततो गत्वा वयं युद्धं दास्यामस्तस्य यत्नतः ।
जेष्यामो यदि ते शत्रून्नोपायैः कृत्यमस्ति नः ॥२३॥

अथ जीवति नः शत्रुर्वयं च कृतसंयुगाः ।
ततः समभिपत्स्यामो मनसा यत्समीक्षितुम् ॥२४॥

वयं युद्धादिहैष्यामो रुधिरेण समुक्षिताः ।
विदार्य स्वतनुं बाणै रामनामाङ्कितैः शितैः ॥२५॥

भक्षितो राघवोऽस्माभिर्लक्ष्मणश्चेति वादिनः ।

तव पादौ ग्रहीष्यामस्त्वं नः काम प्रपूरय ॥ २६॥

ततोऽवघोषय पुरे गजस्कन्धेन पार्थिव ।
हतो रामः सह भ्रात्रा ससैन्य इति सर्वतः ॥ २७॥

प्रीतो नाम ततो भूत्वा भृत्यानां त्वमरिन्दम ।
भोगांश्च परिवारांश्च कामांश्च वसुदापय ॥ २८॥

ततो माल्यानि वासांसि वीराणाम् अनुलेपनम् ।
पेयं च बहु योधेभ्यः स्वयं च मुदितः पिब ॥ २९॥

ततोऽस्मिन्बहुलीभूते कौलीने सर्वतो गते ।
प्रविश्याश्वास्य चापि त्वं सीतां रहसि सान्त्वय ।
धनधान्यैश्च कामैश्च रत्नैश्चैनां प्रलोभय ॥ ३०॥

अनयोपधया राजन्भयशोकानुबन्धया ।
अकामा त्वद्वशं सीता नष्टनाथा गमिष्यति ॥ ३१॥

रञ्जनीयं हि भर्तारं विनष्टमवगम्य सा ।
नैराश्यात्स्त्रीलघुत्वाच्च त्वद्वशं प्रतिपत्स्यते ॥ ३२॥

सा पुरा सुखसंवृद्धा सुखार्हा दुःखकर्षिता ।
त्वय्यधीनः सुखं ज्ञात्वा सर्वथोपगमिष्यति ॥ ३३॥

एतत्सुनीतं मम दर्शनेन
रामं हि दृष्ट्वैव भवेदनर्थः ।
इहैव ते सेत्स्यति मोत्सुको भूर्
महानयुद्धेन सुखस्य लाभः ॥ ३४॥

अनष्टसैन्यो ह्यनवाप्तसंशयो
रिपूनयुद्धेन जयञ्जनाधिप ।
यशश्च पुण्यं च महन्महीपते
श्रियं च कीर्तिं च चिरं समश्नुते ॥ ३५॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com